षड्विधस्तस्य तु बुधैर्दानादानविधिः स्मृतः ॥
गणिमं तुलिमं मेयं क्रियया रूपतः श्रिया ॥"
इति ॥

गणिमं क्रमुकफलादि। तुलिमं कुङ्कुमादि। मेयं शाल्यादि। क्रियया वाहदोहादिरूपयोपलक्षितमश्वमहिष्यादि। रूपतः पण्याङ्गनादि। श्रिया दीप्त्या मरकतपद्मरागादि ॥ * ॥ इत्येतत् षट्प्रकारमपि पण्यं विक्रीयासंप्रयच्छतो दण्डमाह।

"गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति।
सोदयं तस्य दाप्योऽसौ दिग्लाभं वा दिगागते ॥"

गृहीतं मूल्यं यस्य पण्यस्य विक्रेत्रा तद्गृहीतमूल्यं तद्यदि विक्रेत्रा प्रार्थ्यमानाय स्वदेशवणिजे क्रेत्रे न समर्पयति। तच्च पण्यं यदि क्रयकाले बहुमूल्यं सत् कालान्तरेऽल्पमूल्येनैव लभ्यते तदार्घह्रासकृतो य उदयो वृद्धिः पण्यस्य स्थावरजङ्गमात्मकस्य तेन सहितं पण्यं विक्रेता क्रेत्रे दापनीयः। यदा मूल्यह्रासकृतः पण्यस्योदयो नास्ति किन्तु क्रयकाले यावदेव यतो मूल्यास्येयत्पण्यमिति प्रतिपन्नं तावदेव तदा तत् पण्यमादाय तस्मिन् देशे विक्रीणानस्य यो लाभस्तेनोदयेन सहितं द्विकं त्रिकमित्यादि प्रतिपादितवृद्धिरूपोदयेन वा सहितं क्रेतृवाञ्छावशाद्दापनीयः ॥ * ॥ यथाह नारदः।

"अर्घश्चेदवहीयेत सोदयं पण्यमावहेत्।
स्थानिनामेष नियमो दिग्लाभं दिग्विचारिणाम् ॥"
इति ॥

यदा त्वर्घमहत्त्वेन पण्यस्य न्यूनभावस्तदा तस्मिन् पण्ये वस्त्रगृहादिके य उपभोगः तदाच्छादनसुखनिवासादिरूपो विक्रेतुस्तत्सहितं पण्यमसौ दाप्यः। यथाह नारदः।

"विक्रीय पण्यं मूल्येन यः क्रेतुर्न प्रयच्छति।
स्थावरस्य क्षयं दाप्यो जङ्गमस्य क्रियाफलम् ॥"
इति ॥

विक्रेतुरुपभोगः क्षय उच्यते। क्रेतुः सम्बन्धित्वेन क्षीयमाणत्वान्न पुनः कुड्यपातप्रक्षयातादिरूपः। तस्य तु।

"उपहन्येत वा पण्यं दह्येतापह्रियेत वा।
विक्रेतुरेव सोऽनर्थो विक्रीयासंप्रयच्छतः ॥"
इत्यनेनोक्तत्वात्।

यदा त्वसौ क्रेता देशान्तरात् पण्यग्रहणार्थमागतस्तदा तत् पण्यमादाय देशान्तरे विक्रीणानस्य यो लाभस्तेन सहितं पण्यं विक्रेता क्रेत्रे दापयितव्यः। अयञ्च क्रीतपण्यसमर्पणनियमोऽनुशयाभावे द्रष्टव्यः। सति त्वनुशये क्रीत्वा विक्रीय वा किञ्चिदित्यादि मनूक्तं वेदितव्यम् ॥ * ॥ किञ्च।

"विक्रीतमपि विक्रेयं पूर्व्वक्रेतर्यगृह्णति।
हानिश्चेत् क्रेतृदोषेण क्रेतुरेव हि सा भवेत् ॥"

यदा पुनर्जातानुशयः क्रेता पण्यं न जिघृक्षति तदा विक्रीतमपि पण्यं अन्यत्र विक्रेयम्। यदा पुनर्विक्रेत्रा दीयमानं क्रेता न गृह्णाति तच्च पण्यं राजदैविकेनोपहतं तदा क्रेतुरेवासौ हानिर्भवेत्। पण्याग्रहणरूपेण क्रेतृदोषेण नाशितत्वात् ॥ * ॥ अपि च।

"राजदैवोपघातेन पण्ये दोषमुपागते।
हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः ॥"

यदा पुनः क्रेत्रा प्रार्थ्यमानमपि पण्यं विक्रेता न समर्पयति अजातानुशयोऽपि तच्च राजदैविकेनोपहतं भवति तदासौ हानिर्विक्रेतुरेवातोऽन्यददुष्टं पण्यं विनष्टसदृशं क्रेत्रे देयम् ॥ किञ्च।

"अन्यहस्ते च विक्रीतं दुष्टं वा दुष्टवद्यदि।
विक्रीणीते दमस्तत्र मूल्यात्तु द्विगुणो भवेत् ॥"

यः पुनर्विनैवानुशयमेकस्य हस्ते विक्रीतं पुनरन्यस्य हस्ते विक्रीणीते सदोषं वा पण्यं प्राच्छादितदोषं विक्रीणीते तदा तत्पण्यमूल्यात् द्विगुणो दमो वेदितव्यः। * । नारदेनाप्यत्र विशेषो दर्शितः।

"अन्यहस्ते तु विक्रीय योऽन्यस्मै तत्प्रयच्छति।
द्रव्यं तद्द्विगुणं दाप्यो विनयं तावदेव तु ॥
निर्द्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति।
स मूल्याद्द्विगुणं दाप्यो विनयं तावदेव ते ॥"
इति ॥

सर्व्वश्चायं विधिर्दत्तमूल्ये पण्ये द्रष्टव्यः। अदत्तमूल्ये पुनः पण्ये वाङ्मात्रक्रये क्रेतृविक्रेत्रोर्नियमकारिणः समयादृते प्रवृत्तौ निवृत्तौ वा न कश्चिद्दोषः ॥ * ॥ यथाह नारदः।

"दत्तमूल्यस्य पण्यस्य विधिरेष प्रकीर्त्तितः।
अदत्तेऽन्यत्र समयान्न विक्रेतुरविक्रयः ॥" इति ॥

विक्रयानुशयोऽभिहितः क्रीतानुशयस्वरूपं तु प्राक् प्रपञ्चितमधुना तदुभयसाधारणं धर्म्ममाह।

"क्षयं वृद्धिं च वणिजा पण्यानामविजानता।
क्रीत्वा नानुशयः कार्य्यः कुर्व्वन् षड्भागदण्डभाक् ॥"

परीक्षितक्रीतपण्यानां क्रयोत्तरकालं क्रयकालपरिमाणतोऽर्घकृतां वृद्धिमपश्यता क्रेत्रानुशयो न कार्य्यः। विक्रेत्रा च महार्घनिबन्धनं पण्यक्षयमपश्यता नानुशयितव्यम्। वृद्धिक्षयपरिज्ञाने पुनः क्रेतृविक्रेत्रोरनुशयो भवतीति व्यतिरेकादुक्तम्भवति। अनुशयकालावधिश्च नारदेनोक्तः।

"क्रीत्वा मूल्येन यः पण्यं दुःक्रीतं मन्यते क्रयी।
विक्रेतुः प्रतिदेयं तत् तस्मिन्नेवाह्न्यविक्षतम् ॥
द्वितीयेऽह्नि ददत् क्रेता मूल्यात्त्रिंशांशमावहेत्।
द्विगुणन्तु तृतीयेऽह्नि परतः क्रेतुरेव तत् ॥"
इति ॥

अपरीक्षितक्रयविक्रये पुनः पण्यवैगुण्यनिबन्धनानुशयावधि दशैकपञ्चसप्ताहेत्यादिना दर्शित एव। तदनया वाचो युक्त्या वृद्धिक्षयपरिज्ञानस्यानुशयकारणत्वमवगम्यते। यथा पण्यपरीक्षाविधिवशात् पण्यदोषाणां अतः पण्यदोषे तद्वृद्धिक्षयकारणचिन्तयाभावेऽनुशयकालाभ्यन्तरेऽपि यद्यनुशयं करोति तदा पण्यषड्भागं दण्डनीयः। अनुशयकारणसद्भावेऽपि अनुशयकालातिक्रमेणानुशयं कुर्व्वतोऽप्ययमेव दण्डः। उपभोगेनाविनश्वरेषु स्थिरार्थेष्वनुशयकालातिक्रमेणानुशयं कुर्व्वतो मनूक्तो दण्डो द्रष्टव्यः।

"परेण तु दशाहस्य न दद्यान्नापि दापयेत्।
आददानो ददच्चैव राज्ञा दण्ड्यः शतानि षट् ॥"

इति मिताक्षरायां विक्रीयासम्प्रदानं नाम प्रकरणम् ॥

अथ बृहस्पतिः।

"कुषीदकृषिवाणिज्यं प्रकुर्व्वीतास्वयं कृतम्।
आपत्काले स्वयं कुर्व्वन् नैनसा लिप्यते द्विजः ॥
लब्धलाभः पितॄन् देवान् ब्राह्मणांश्चैव पूजयेत्।
ते तुष्टास्तस्य तं दोषं शमयन्ति न संशयः ॥
वणिक् कुषीदी दद्यात्तु वस्त्रगोकाञ्चनादिकम्।
वणिक् कुषीददोषः स्यात् ब्राह्मणानाञ्च पूजनात् ॥"
इत्याह्निकतत्त्वम् ॥

**बा(वा)णिज्या**, स्त्री, ( बाणिज्य + टाप्। अभिधानात् स्त्रीत्वम्। ) बाणिज्यम्। इति जटाधरः ॥

**बा(वा)ध**, ऋ ङ विहतौ। इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-सक०-सेट्। ) ऋ, अवबाधत्। ङ, बाधते। जनं न सत्त्वेष्वधिको बबाधे। इति रघुः ॥ २ । १४ ॥ इति दुर्गादासः ॥

**बा(वा)धः**, पुं, ( बाधनमिति। बाध + भावे घञ्। ) प्रतिबन्धकः। आघातः। ( यथा, ऋग्वेदे। ६।५१।४।
"यदीमर्भे महति वा हितासो बाधे मरुतोअङ्काम देवान् ॥" ) न्यायमते साध्याभाववत्पक्षः। यथा। ह्रदो वह्निमान्। इति सामान्यनिरुक्तिगादाधरी ॥

**बा(वा)धकः**, पुं ( बा(वा)धते इति। बाध + ण्वुल्। ) स्त्रीरोगविशेषः। यथा,—

"रक्तमाद्री तथा षष्ठी चाङ्कुरो जलकुमारकः।
चतुर्विधो बाधकः स्यात् स्त्रीणां मुनिविभाषितः ॥
तेषां स्वभावं वक्ष्यामि यथाशास्त्रं विधानतः।
एतेषां पूजनं कार्य्यं जनैः सन्तानकाङ्क्षिभिः ॥
निःसारणं स्थापनञ्च बलिदानं जपस्तथा।
कर्त्तव्यो गुरुवाक्येन यथाशास्त्रं विचक्षणैः ॥
चतुर्विधो बाधकस्तु जायते ऋतुकालतः ॥"

तस्य लक्षणं यथा,—

"यथा कट्यां तथा नाभेरधः पार्श्वे स्तनेऽपि च।
रक्तमाद्रीप्रदोषेण जायते फलहीनता ॥
मासमेकं द्वयं वापि ऋतुयोगो भवेद्यदि।
रक्तमाद्रीप्रदोषेण फलहीना तदा भवेत् ॥"
इति रक्तमाद्र्याः ॥

"नेत्रे हस्ते भवेज्ज्वाला योनौ चैव विशेषतः।
लालासंयुतरक्तञ्च षष्ठीबाधकयोगतः ॥
मासैकेन भवेद्यस्या ऋतुस्नानद्वयं तथा।
मलिना रक्तयोनिः स्यात् षष्ठीबाधकयोगतः ॥"
इति षष्ठ्याः ॥